National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 327-331
© 2026 NJHSR
www.sanskritarticle.com

**डॉ.सिद्धार्थशङ्करदाशः**
सहायकाचार्यः,
धर्मशास्त्रविद्याशाखा,
के.सं.वि.वि.श्री सदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ.सिद्धार्थशङ्करदाशः**
सहायकाचार्यः,
धर्मशास्त्रविद्याशाखा,
के.सं.वि.वि.श्री सदाशिवपरिसरः, पुरी
ओड़िशा-751022

# मनुस्मृतेः अनुशासनस्य समीक्षणम्

**डॉ. सिद्धार्थशङ्करदाशः**

**सारांश (Abstract)-**

भारतीयसंस्कृतेः मूलाधारः धर्मः इति सर्वविदितम्। धर्मस्य संरक्षणाय समाजव्यवस्थायाश्च सुचारुपालनाय अनुशासनस्य महत्त्वं सर्वदा स्वीकृतम्। मनुस्मृतिः प्राचीनभारतीयधर्मशास्त्रेषु प्रमुखा स्मृतिः। यस्याम् व्यक्तिगतजीवनस्य, सामाजिकव्यवस्थायाः, राजधर्मस्य, शिक्षायाः तथा नैतिकमूल्यानां च विषये विस्तृतनिर्देशाः प्रदत्ताः सन्ति। प्रस्तुते शोधलेखे मनुस्मृतौ प्रतिपादितस्य अनुशासनतत्त्वस्य विश्लेषणात्मकम् अध्ययनं क्रियते। अध्ययनस्य उद्देश्यं भवती यत् मनोः अनुशासनविचारस्य स्वरूपं, प्रयोजनं, सामाजिकप्रासङ्गिकतां च विवेचनम्। अध्ययनात् ज्ञायते यत् मनुना अनुशासनं केवलं दण्डविधानरूपेण न, अपितु व्यक्तेः चरित्रनिर्माणस्य, समाजसंरक्षणस्य तथा राष्ट्रव्यवस्थायाः आधाररूपेण प्रतिपादितम्। आधुनिकसमाजे अपि तस्य किञ्चित् प्रासङ्गिकत्वं दृश्यते।

**मुख्यशब्दाः –** मनुस्मृतिः, अनुशासनम्, धर्मः, राजधर्मः, सामाजिकव्यवस्था, भारतीयचिन्तनम्।

**शोध-उद्देश्यानि-**

1. मनुस्मृतौ अनुशासनस्य स्वरूपज्ञानम्।
2. मनोः अनुशासनविचारस्य सामाजिकमहत्त्वविवेचनम्।
3. राजधर्मे शिक्षायां च मनूक्तानुशासनस्य भूमिकानिरूपणम्।
4. आधुनिकसमाजे तस्य प्रासङ्गिकतापरीक्षणम्।

**उपक्रमः**

धर्मप्राणेऽस्मिन् भारतवर्षे धर्मस्य स्थानं सर्वोपरि वर्त्तते। धर्मं विना न कोऽपि जनः इह जन्मनि परजन्मनि च स्थातुमर्हति। धर्म एव मानवस्य परमो बन्धुः स एव तस्य धारणं करोति।कथ्यते महाभारते-(महा.८.४९.५०)

**"धारणाद्धर्म इत्याहु: धर्मो धारयते प्रजाः। य स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥"**

अयमेव जगदः धारकः,पालकः परिचायकश्च भवति। अनेन प्रजाश्च धार्य्यन्ते। अतः उक्तम् "धर्मो धारयते प्रजा" रिति। मीमांसायामपि "अथातो धर्म जिज्ञासा" इति महर्षि जैमिनिना प्रथमसूत्रं सूत्रितम्(मी.सू.1/1/1)। पालनं तु संसारस्य शासनं विना न सम्भवति। अतोऽयं धर्मः शासकरित्यपि कथ्यते। एवं यत् शासनं करोति तदेव शास्त्रं तथा यत्र धर्मः प्रतिपाद्यते तद्धर्मशास्त्रमिति कथ्यते। अस्यापि धर्मशास्त्रस्य स्मृतिरिति अपरं नामो भवति। यदुक्तं मनुना –(मनु. २.१०)

**"श्रुतिस्तु वेदविज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति।"**

धर्मशास्त्रस्यापि वेदानुमापकत्वेन धर्मे प्रामाण्यमिति महर्षिजैमिनिना "स्मृत्यधिकरणे" प्रतिपादितम्। वेदस्य मूलप्रमाणत्वेनोक्तं गौतमेन – **"ॐ वेदो धर्ममूलमिति"**। (गौ.ध.सू.1/1/1)

अस्यैव धर्मशास्त्रस्य बहवो धर्मशास्त्रकाराः विद्यन्ते। तेषां नामानि योगीश्वरेण याज्ञवल्क्येन प्रतिपादितं यत् –

**"मन्वत्रिविष्णुहारीत...धर्मशास्त्रप्रयोजकाः॥"** इति (या. स्मृ.१.३-४)

एतेषु धर्मशास्त्रकारेषु महर्षिमनुः प्रप्रथमो धर्मशास्त्रकारो भवतीति न काश्चिद्विप्रतिपत्तिः । पुनश्च मनुवचनविरुद्धा स्मृतिः न प्रामाण्यते इति वक्तुमुच्यते यत् "मन्वर्थ विपरीतास्तु या स्मृतिः सा न शस्यते" इति। किञ्च उक्तं मनुस्मृतिभूमिकायाम्-

**"मनुस्मृतिविरुद्धा या सा स्मृतिर्न प्रशस्यते ।**
**वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतेः ।।"** इति

अत्र मनुना यत्किमपि उक्तं तद्भेषजस्वरूपं भवति । यदुक्तमस्ति तत्रैव-'मनुर्वै यत्किमप्यवदत्तद्भेषजं भेषजतायै' इति। अत्र तेन मुख्यतः धर्मं परिलक्ष्य पुरुषार्थचतुष्टयप्राप्त्यर्थं चतुर्णां वर्णानां धर्मः, तेषामाचारः, तेषां कर्माणि च आश्रमविशेषे कथ्यते । यथोक्तं तेन – (मनु. १.१०७)

**"अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ।**
**चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ।।"** इति

अत्र सम्पूर्णे शास्त्रे मनुना उपदेशात्मकवाक्यानि प्रदत्तानि धर्मज्ञापनार्थम्। अर्थात् किं कर्तव्यं, किम् अकर्त्तव्यं, कथं कर्त्तव्यं, केन कर्तव्यमिति कर्त्तव्याकर्त्तव्यविनिश्चयोऽत्र निर्देशितः । सर्वस्मिन्युगे अस्यानुशासनस्यावश्यकं परिलक्ष्यानेनास्य शास्त्रस्य रचनां कृतवान् । सम्प्रत्यपि कार्यस्य सौलभार्थं सुपरिचालनार्थञ्च सर्वेषु क्षेत्रेषु सम्पूर्णे विश्वेऽस्यानुशासनस्य महत्त्वं दरीदृश्यते । यथा- विद्यालयीयप्रशासनं, कार्यालयीयप्रशासनं, देवालयीयप्रशासनं, आरक्षकीयप्रशासनं, विचारालयीयप्रशासनम् इत्यादिः। यथा प्रशासनमनुशासनं वा भवति तथैव तस्य परिचालनार्थं प्रदर्शनार्थं च अनुशासकस्य प्रशासकस्य वा आवश्यकं परिलक्ष्यते। अतः प्रशासकरूपेण सर्वकारः, संसद्, राजा,राज्यपालः, प्रधानमन्त्री, मुख्यमन्त्री, जिल्लापालः, प्रचार्यः, आचार्यः अध्यापकः, शिक्षकः, पूजकश्चेति तत्स्थानेऽस्मिन् कश्चिद्विशेषेण नियुक्तश्च भवति। परन्तु यदा स एव स्वयमनुशासनस्य पालनं न करोति तर्हि तस्य कृते शास्त्रं स्वयमनुशासको भवति। अत एवोक्तं यत् "शास्तीति शास्त्रम्" इति। तर्हि मनोरनुशासनं कथमस्तीति जिज्ञासायां मनुस्मृतेः मन्थनं कर्तव्यम्।

**विषयोपस्थापनम्-**

यथा श्रीमता महात्मागान्धिना शर्करां (सुगर) त्यक्तुं बालकाय उपदेष्टुं स्वयमेवादौ त्यक्त्वा ततः उपदिष्टवान् तथा भगवता मनुनाऽपि स्वयमेवाचरयित्वा अनुशासनस्योपदेष्टुं भणति यत् –(मनु. २.२०)

**"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः ।।"** इति

एवञ्च तेन यथाऽनुशासनस्योपदेशं प्रदत्तं तथैव तस्य महत्त्वं पालनोपायाश्चोक्तम्। अनुशासनहीनार्थमपि दण्डविधानं तेन कथितमस्ति स्वशास्त्रे। अनुशासनपदेन यः शिष्टाचारः नियमश्चाभिलक्ष्यते, तस्य पालनमनुकरणं सम्बोध्यते। अत आदौ मानवकृते यदनुशासनं कर्त्तव्यं च वर्तते, तदालोच्यते अध्यायपुरःसरम्। तत्र प्रथमाध्याये प्रप्रथमं युगानुसारं धर्मः वक्ष्यते। तत्र सत्ययुगे तपः, त्रेतायां ज्ञानं, द्वापरे यज्ञश्च धर्म आसीत्। इदानीन्तने कलियुगे दानमेकं भवति धर्मः। पुनश्च तत्र चतुर्णां वर्णानां कर्माणि विहितानि। यथा – (मनु. १. श्लो.८८-९१)

**"अध्यापनमध्ययनं यजनं ... शुश्रूषामनसूयया ।।"** इति।

एवं तत्रानुशासकत्वेनोत्तमाङ्गोद्भवाज्यैष्ठाद् ब्रह्मणश्च धारणात् धर्मतः ब्राह्मणः सम्पूर्णसृष्टेः स्वामी (प्रभुः) भवतीत्युक्त्वा जगतः रक्षार्थं स्वयम्भुब्रह्मा तं प्रथमं सृष्टवान्निति कारणात्स एव समस्तजगतः रक्षां कुर्यात् । तेन तस्य पंक्तयः वंश्याः सप्तपुरुषाश्च पवित्राणि पावकाश्च भवन्ति । अन्यथा तस्य वीपरीतेन तस्य सकुलं नाशो भवति। पुनश्च द्विजानां कृते श्रुत्युक्तः स्मार्तोक्तश्चाचारः परमो धर्मो भवति अन्यथा आचारहीनः ब्राह्मणो वेदफलं न प्राप्नुयात् । मनुना यः कश्चिद्धर्मः कस्य कृते प्रोक्तः स वेदमूलत्वेनोक्तः । अत एव मनोरनुशासनं साक्षाद्वेदमनुसृत्य कल्प्यते । उक्तं यत् –(मनु. २. श्लो ७)

"यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्वोऽभिहितो वेदो सर्वज्ञानमयो हि सः ।।"

वस्तुतो सर्वे यदि पृथिव्यां स्वानुशासने तिष्ठन्ति, तर्हि तदा सर्वत्राहिंसा प्रतिभाति । यदर्थं सर्वे स्वाधीनरूपेण स्वच्छन्दतया निर्भयेन विचरन्ति । यदुक्तमस्ति तेन -(मनु. २. श्लो – २३)

**"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।**
**स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः ।।"**

अस्य मतेन येषां द्विजानां यथाकालमुपनयनसंस्कारः नाभवत् ते व्रात्यपदवाच्यत्वादेतैः सह आपद्यपि वेदाध्ययनविवाहादिसम्बन्धः न स्थापयेत् । पुनश्चाचरणार्थे नियमयति यत् उच्छिष्टं कमपि न दद्यात् स्वयञ्चापि न भुञ्जीत इति। सम्मानार्थे बृद्ध-राजा-स्त्री-स्नातकादीनां कृते पन्था देयरिति तेनोक्तम्। धर्माभिलाषीपुरुषः (आचार्यगुर्वादयः) सर्वथा भूतानां (शिष्यादीनां) अहिंसयैव (स्वल्पताडनादिभिः) कल्याणार्थकोपदेशमाध्यमेन (अध्यापनेन) अनुशासनं कुर्यात्। यथोक्तं तेन -(मनु. २.श्लो १५९)

**"अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।**
**वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ।।"**

संप्रत्यपि तथैव विद्यालय-महाविद्यालयादिषु एवं दण्डमुक्तस्थान-रूपेण विधानं दृश्यते ।

पुनश्च तेनोक्तं यत् मानवः स्वयं दुःखितं भूत्वाऽपि कदाचिदपरं दुःखं न प्रयेच्छेत्तथान्यस्यापकारं तादृशवचनं च न वदेद्येन अन्यः दुःखितो भविष्यति । ब्राह्मणः सर्वथा संयतोन्द्रियः सन् वेदाध्ययनार्थं नियमयति सः, अन्यथा स सकुलं शूद्रत्वमाप्नोतीत्युक्तवान् । पुनश्च ब्रह्मचर्याश्रमे द्विजः कृतोपनयनः सन् गुरोः समीपे उषित्वा यद्विहितं चर्म-सूत्र-मेखला-दण्ड-वस्त्र-यज्ञोपवीतादिकं धारयित्वा भिक्षाग्रहण-पूर्वकं शुचितः वेदाध्ययनं कुर्वन् संयतेन्द्रियः सन् तत्र मधुमांसगन्धमाल्यादिवर्जनपूर्वकं स्थित्वा सर्वथा प्राणीहिंसनं द्यूतं, जनवादं, परिवादं, अनृतभाषणं, परोपघातं,कामक्रोधलोभमोहादिकं, स्त्रीदर्शनालिङ्गनादिकञ्च परित्यजेत् सः। गुरोः परिवादं न कुर्यात्, नापि श्रृणुयात्। यानासनस्थश्च शिष्यः ततोऽवरुह्याभिवादयेत् गुरुम्। सर्वथा गुरोरभिवादनं कुर्यात्। यद्यप्येतत्सर्वं ब्रह्मचारिव्रतरूपं भवति, तथापि ब्रह्मचर्याश्रमे नाम गुरुकुलेऽस्य पालनं विनाऽनुशासनस्य भङ्गो भवति । एवमस्य पालनं यदि कश्चिन्न करोति स्म, तर्हि तदा

तस्मात् आश्रमात् स निष्कास्यते स्म। पुनश्च यदि स नैष्ठिकब्रह्मचर्य्यव्रतं पालयति तर्हि स परमस्थानं सम्प्राप्य पुनः जन्म न लभते इति तस्य पुरुषार्थः कल्प्यते। सम्प्रत्यपि विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च छात्राः विद्यालयेन निर्धारितं वस्त्रं धारयित्वा समयेनागत्याध्यापनं नियमितरूपेण कुर्वन्तः परिलक्ष्यन्ते। परन्तु यथा मनुकालेऽनुशासनं छात्रेषु परिलक्ष्यते स्म, तथा सम्प्रति न परिलक्ष्यते। अतो मनोरनुशासनं सर्वोत्तमं वर्त्तते। एवं गृहस्थाश्रमेऽपि स्त्रीपुरुषयोः कृते गार्हस्थ्यधर्मः परिकल्पितः मनुना। तत्र सर्वादौ ब्रह्मचारी यथाविधिः वेदाध्ययनं समाप्य गुरुकुले गुरवे च दक्षिणां दत्त्वा स्नानं कृत्वा ततः उपर्युक्तलक्षण्यां सवर्णामसपिण्डामसगोत्रां भार्यामुद्वहेदिति तेनोक्तम्। किञ्च यद्यपि तेन ब्राह्मणस्य कृते चतुर्वर्णेषु, क्षत्रियस्य क्षत्रियवश्यशूद्रेषु, वैश्यस्य वैश्यशूद्रयोः च वर्णेषु विवाहः विकल्पेन कल्पितः । तथापि तस्य निवारणार्थं कथयति यत् –(मनु.३/१५)

**"हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः ।**
**कुलान्येव नयन्त्याशु समन्तानानि शूद्रताम् ।।"**

अन्यान्यपि निषिद्धवचनानि तेन तृतीयाध्यायस्य षोडशश्लोकात् उनविंशश्लोकपर्यन्तमुक्तानि । तदर्थं तत्राष्टविवाहानां कल्पनं कृत्वा ब्राह्मविवाहं सर्वोत्कृष्टं विवेचयति मनुः । एवं राक्षसपैशाचासुराणां विवाहानां निन्दां करोति । तत्रापि ब्राह्मदिषु चतुषु विवाहार्थं प्रेरयति। किन्तु गान्धर्वादिषु चतुर्षु नृशंसानृतवादिनरधर्माश्च पुत्रा जायन्ते इति एतेषां निन्दां करोति सः। पुनश्च सवर्णासु पाणिग्रहणमुपदिश्यासवर्णास्वयं विवाहविधिः तेनोक्तः ।

(मनु. ३.श्लो. ४४)

तथैव स्त्रियाः ऋतुकाले सर्वथा स्त्रीगमनं न कुर्यात्पुरुषः। तत्र षोडशदिनात्मकऋतुकालेषु आद्य चतस्त्ररात्रयः परित्यक्ताः भवन्तीति एवमन्यत्र ब्रह्मचर्यव्रतपालनार्थमुक्तं यत् –(मनु. ३.श्लो. ५०)

**"ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन्" इति।**

तथैव पिताऽपि कन्यादानार्थं शुल्कं न गृहणीयात्कदापि अन्यथा सोऽपत्यविक्रयीभूत्वाऽधोगतिं प्राप्नोतीति उक्त्वा तेनार्षविवाहे गोमिथुनमपि नेतुं वारयति । एवं सर्वदा पितृभ्रातृपतिदेवरादिभिः नारी पूज्या भवेत्। यदुक्तं तेन –(मनु. ३.श्लो. ५६)

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" इति ।**

अन्यथा यत्र नार्यः शोचन्ति, शपन्ति च तत्र सर्वे आशुः विनश्यन्ति सकुलमिति अतः सर्वथा भार्यया भर्ता, भर्त्रा भार्या च सन्तुष्टो कुर्यात् । नोचेत् सन्तानोत्पत्तिः न सम्भवति। एवमपि गृहस्थः प्रतिदिनं पञ्चमहायज्ञान् अनुष्ठातुं तेषां स्वरूपं तेनोक्तं यत् –(मनु. ३.श्लो. ७०)

**"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।**
**होमो दैवो बलिर्भोतो नृयज्ञोऽतिथिपूजनम्।"**

तत्र दम्पती गृही सर्वान् भोजयित्वाऽन्ते देवार्चनपूर्वकं भोजनं कुर्यादित्युक्तं यथा-

**"भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती"** इति ।

गृही श्राद्धेऽब्राह्मणान्न भोजयेदित्यपि तेन तृतीयाध्याये वहुशः विवच्य अनया विधिना यदि गृहस्थः गृहस्थाश्रमे तिष्ठति तर्हि गृहस्थजीवनमनुशासितं भविष्यति। एवं प्रकारेण चतुर्थाध्याये मनुना स्नातकव्रतमुक्त्वा तत्र अध्ययनविधिं भक्षाभक्षञ्च नियम्य स्नातकस्य व्यक्तित्ववर्धनं प्रदर्शितमस्ति । तत्र कानिचनानुशासनात्मकवचनानि कथितानि ।यथा –

मानवोऽधिकधनोपार्जनाय निन्दितलोकवृतं नाचरेत्। अपितु सुखार्थी स्वपरिवारभरणपोषणार्थं यावदावश्यकं तावदेवोपार्जयित्वा सर्वथा सन्तोषेन तिष्ठेत्। कारणं 'सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः' इति। अतः स्नातकः शिलोञ्छवृत्या जीवनयापनं कृत्वा अग्निहोत्रादिकं कृत्वा स्वाध्यायविरोधिनोऽर्थान्परित्यज्य वयः-कर्म-अर्थ-श्रुत-कुलादीनामनुसारं नित्यं वेषवाग्बुद्धिसारूप्यमाचरन्विचरेत्। अत्रापि पञ्चमहायज्ञानुष्ठातुम् अतिथिसत्कारार्थञ्च आसनाशनशय्या-जलमूलफलादिभिः शक्तितोऽतिथिपूजनं कुर्यात् गृहे । अन्यथा कोऽपि अतिथि तस्य गृहे न तिष्ठेत्। क्षुधया पीडितः सन् स्नातकः राजा-यजमान-शिष्येभ्य एव धनं नयेन्नत्वन्यतः। स्नातकः विप्रः शक्तः सन् कथञ्चन्नपि क्षुधया न सीदेत्, तथैव विभवे सति न जीर्णमलवद्वासा भवेत्। एवञ्च सर्वथा शौचं भवेत्। उद्यन्तमस्तगतञ्चादित्यं न इक्षेत्। शौचाशौचविधिन्नपि चतुर्थाध्याये उक्त्वा ततः पञ्चमाध्याये द्विजादीनां भक्षाभक्ष्यं वर्णयति मनुः । तत्र लशुनं, गृञ्जनं, पलाण्डुं, कवकानि, शेलुं, गण्यं, वृथामांसं, अनर्चितञ्च न भुञ्जीत मानवः । अनिर्दशायाः गोः, औष्ट्रस्य, एकशफस्याविकस्य, मृगस्य, माहिष्यस्य, स्त्रियाश्च क्षीरं न पीवेत्। मांसभक्षणस्य निन्दां कृत्वा सो वदति यत् –

(मनु.५. श्लो १५)

**"यो यस्य मांसमश्नाति स तन्मांसाद् उच्यते ।**
**मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत् ।।"इति**

अस्य प्रतिप्रसवमपि तेनोक्तं यत् –(मनु. ५. श्लो.१८)

**"श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा ।**
**भक्ष्यान्पञ्चनखेष्वाहुरनुष्ठां श्चैकतोदतः ।।" इति**

पुनश्च मांसभक्षणस्य विशेषनियमः तेन कल्पितः यत् –मनु.५.२७

**"प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च कव्यया ।**
**यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ।।"**

अन्यथा नियुक्तं भूत्वाऽपि मानवः श्राद्धमधूपर्कादिषु मांसभक्षणं न करोति। सो मरणात्परमेकविंशतिजन्मपर्यन्तं पशुजन्म लभते। यतोहि मधुपर्कयज्ञपितृकर्मादिषु पशुर्हिंसा भवितुमर्हति न तु अन्यत्र इति कथयित्वा तस्य निवर्तनवाक्यं कथयति यत् –(मनु.५. श्लो ५६)

**"न मांसभक्षणे दोषो न मद्ये न च मैथुने ।**
**प्रवृत्तिरेषां भूतानां निवृत्तिस्तु महाफलाः ।।"**

एवं प्रकारेण पञ्चमाध्याये सपिण्डेष्वसपिण्डेषु च आशौचविधिं प्रोक्त्वा तत्र दन्तजातेऽनुजाते, कृतचूडे, सूतकसंस्थिते च सर्वे बान्धवा अशुद्धाः भवन्तीत्युक्त्वा तदर्थं शौचविधिं कल्पयति सः । उक्तं यत् –(मनु.५. श्लो ५९)

**"दशाहं शावमाशौचं सपिण्डेषु विधियते।"**

जननाशौचे तु केवलं मातापित्रोः सूतकं भवति । तत्रापि विशेषतः मातुरेवाशौचं जायते पितुस्तु स्नानमात्रेणैव शुद्धिः। पुनश्च अग्निसंस्कारार्थमुक्तं तेन यत् – उनद्विवार्षिकस्याग्निसंस्कार उदकक्रिया

च न, सहाध्यायिनिमृते एकारात्रमाशौचं तथा समानोदकस्य मृते त्रिरात्रमाशौचं, तथैव स्त्रीणामसंस्कृतानां मृते बान्धवाः त्र्यह्नात् शुद्ध्यन्ति। आशौचकाले अक्षारलवणान्नं मांसभक्षणं च न कुर्यात्। भूमौ एकाकी शयीत । विदेशस्थः यदि श्रृणुयात्तर्हि दशरात्रस्य यच्छेषं तावदेवाशौचं , अतिक्रान्ते तु दशाहे त्रिरात्रमाशौचं कर्त्तव्यम्। सम्वत्सरे व्यतीते च स्नानमात्रेण शुद्धिः। पुनश्चान्तर्दशाहे यदि पुनराशौचं भवेत्तर्हि पूर्वाशौचेन शुद्धिः, आचार्यस्य श्रोत्रियस्य च देहान्ते त्रिरात्रमाशौचम् एवं मातुल-शिष्य-ऋत्विग्-वान्धवादीनां तु मृते पक्षिणीं रात्रिम् अशौचं, प्रेते राजनि सज्योतिराशौचं निर्वहेत् । वर्णानुक्रमेण ब्राह्मणादीनां दशाहेन, द्वादशाहेन, पञ्चदशाहेन मासेन च शुद्धिर्भवति । उक्तं यत्तेन–(मनु.५.८३)

**"शुद्धयेद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।**
**वैश्य : पञ्चदशाहेन शूद्रो मासेन शुद्धयति ।।"**

पुनश्च सामान्यतया चण्डाल-रजवती स्त्री-पतित-सूतिका-शवस्पृष्ट्यादीनां स्पर्शेन स्नानं कृत्वा शुद्धिर्भवति। ब्रह्मचारी व्रतस्य समापनं यावत् उदकदानं न कुर्यात्। समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुद्धयति। आचार्य-उपाध्याय-पितृ-मातृ-गुर्वादीनां शवं निर्हृत्य ब्रह्मचारी व्रतेन न विमुक्तो भवति। आशौचानन्तरं विप्रः जलैः स्नानं कृत्वा, क्षत्रियः वाहनायुधं स्पृष्टवा, वैश्यः प्रतोदं रश्मीन्वा स्पृष्ट्वा, शूद्रः यष्टीं दक्षिणहस्तेन स्पृष्ट्वा च शुद्धयन्ति। सर्वेषां शौचानां परमं शौचमर्थशौचं भवतीति तेनोक्तमस्ति। तेन कथितं यत् –

(मनु.५.१०७)

**"क्षान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्यकारिणः ।**
**प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ।।"** इति

प्राकृतिकशुद्धिज्ञानमपि तेन कथितं यत्- मलिनपदार्थः मृत्तायैः, नदीवेगेन, रजसा मनोदुष्टा स्त्री, सन्यासेन द्विजोत्तमश्च, अद्भिर्गात्राणि, मनः सत्येन, विद्यातपोभ्यां भूतात्मा, बुद्धिर्ज्ञानेन, अश्ममयपदार्थानां भस्ममृदद्भिः प्रोक्षणेन,प्रक्षालनेन, मार्जनेन च दारुमयपदार्थानामपि अनेन प्रकारेण, मृण्मयपदार्थानि तु पुन पाकेन, भूमिः सन्मार्जनादिभिः च विशुद्ध्यन्ति। नाभेरुर्ध्वं यानि छिद्राणि तानि सर्वत्र मेध्यानि भवन्ति । एवमेषः शौचनियमः गृहस्थानां कृते किन्तु ब्रह्मचारी द्विगुणं, वानप्रस्थः त्रिगुणं, यतिस्तु चतुर्गुणं शौचं कुर्यादित्युक्तं तेन। एतदनन्तरं सः तत्रैव स्त्रीधर्मान्नर्थात्स्त्रीणामनुशासनं वक्तुमादौ स्त्री स्वतन्त्रतया किमपि कार्यं न कुर्यादिति उक्त्वाऽवस्थाविशेषे स्त्रियाः रक्षार्थं पारतन्त्र्यमुक्तवान् सः। यथा – (मनु.५.श्लो. १४८)

**"बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने ।**
**पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतन्त्रताम् ।।"** इति

अतः स्त्री पितृभर्तापुत्रादीनां विरहेण कदापि एकाकिनी न तिष्ठेत्। स्त्री सर्वथा गृहकार्येषु दक्षा भवेत्। यस्मै वराय पित्रादिभिः सा दीयते तम् आजीवनं शुश्रूषेत, मृतेऽपि तस्य न लङ्घयेत। मङ्गलकार्याणि पत्या सह कुर्यात्। उक्तं यत् –

**"नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।**
**पतिं शुश्रूषते येन तेन स्वर्गे महीयते ।।"** इति (मनु. ५. १५५)

भर्तरि मृते स्त्री साध्वी रूपेण ब्रह्मचर्ये तिष्ठन्ती अपुत्रापि स्वर्गमवाप्नोति। कारणमन्योत्पन्ना प्रजा इह शास्त्रोक्तपुत्रत्वेन न कथ्यन्ते। पुनश्च भर्तुः व्यभिचारात् स्त्री लोके निन्द्यते । एवमव्यभिचारिणी सन् साध्वीरूपेण इह जन्मनि परजन्मनि च कीर्तिमाप्नोति । एवं प्रकारेण विधिवत्स्नातको द्विजः गृहस्थाश्रमे स्थित्वा यदा वली पलितमात्मनः पश्येत्किम्वाऽपत्यस्यैव चापत्यमुखं पश्येत्तदाऽरण्यं समाश्रयेन्नाम् वानप्रस्थी भवेत्। तदा ग्राम्यमाहारं परिच्छदादिकं सर्वं परित्यज्य पुत्रेषु भार्यां निक्षिप्य किम्वा सहैव नीत्वा वनं गच्छेत्। तत्रापि ब्रह्मचर्यव्रतपालनरूपकं पञ्चमहायज्ञन् विधाय मधुमांसादिवर्जयित्वा अग्निपक्वाशनो कालपक्वाशनो वा भूत्वा वने तिष्ठन् भिक्षार्थं तापसेष्वेव विप्रेषु यात्रिकेषु वा भैक्षमाहरेदभावे तु वनवासिषु भैक्ष्यमाचरेत्। एवं वने तिष्ठन् यदि तत्र मृत्युर्न जायते तर्हि अन्तिमभागे आयुषः सर्वं त्यक्त्वासन्यासाश्रमे प्रविशेत्। तत्र जितेन्द्रियः सन् त्रीणि ऋणानि अपाकृत्य मनो मोक्षे निवेशयेत्। मनुना मोक्षस्य लक्षणं प्रतिपादितं यत् –(मनु. ६.श्लो. ४४)

**"कपालं वृक्षमूलानि कुचेलमसहायता ।**
**समता चैव सर्वस्मिन्नैतन्मुक्तस्य लक्षणम् ।।"** इति

एवं चतुर्णां वर्णानामाश्रमाणां च नियमान्नुक्त्वा तत्र गृहस्थाश्रमः श्रेष्ठरित्युक्तवान् । तदनन्तरं समयानुसारमधर्मस्य वृद्धिकारणात् बलवद्धयाच्च शिष्टानां पालनार्थमस्यानुशासनस्य च रक्षार्थं राज्ञः राजधर्मः, प्रजानां न्यायपूर्वकं परिरक्षणं परमकर्त्तव्यमित्युक्त्वा राज्ञः दण्डसदृशत्वं च वर्णयति । यथोक्तं तेन (मनु. ७/ १७)

**"स राजा पुरुषो दण्डः स नेता शासिता च सः ।**
**चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ।।"**

अतो राजा सर्वथा दण्ड्येषु अतन्द्रितः सन् दण्डं प्रयच्छेत्। अन्यथा मात्स्यन्यायेन सबलाः दुर्बलान् पीडयन्तीति दण्डप्राधान्यमपि तेनोक्तम् –(मनु.७.श्लो. १८)

राज्ञः न्यायपूर्वकं दण्डप्रयोगनियमश्च तेनोक्तः यत् –(मनु.७.श्लो. ३२)

**"स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु ।**
**सुहृत्स्वजिह्म : स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ।।** इति

एवं राजा संयतेन्द्रियः, दण्डधारी, विद्याविनययुक्तः,निर्व्यसनी च सन् दूतामात्यमन्त्रीपुरोहितसुहृदादिभिः लब्धलाभाय लब्धपरिरक्षणाय परिवर्धनाय च चेष्टां कृत्वा सुखेन प्रजापरिपालनं दुष्टदमनञ्च विधाय राज्यरक्षणं कुर्यात् । राज्यरक्षणार्थं राज्ञः षड्गुणाः तेनोक्ताः - "सन्धिं च विग्रहं चैव यानमासनमेव च। द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ।।" इति

अतः राजा प्रजापालनार्थं दुष्टपरिज्ञानं तदर्थं दण्डविधानञ्च महदावश्यकमिति हेतोः व्यवहारदर्शनमहरहः कर्तव्यमिति तेनोपदिष्टम् अष्टमाध्याये नवमाध्याये च। तत्र को नाम व्यवहार इति यद्यपि मनुना न प्रतिपादितं तथापि टीकायां कुल्लूकभट्टेन कात्यायनवचनमुद्धृतं यत् –(मनु.मन्वर्थ.८-१)

**"विना नार्थेऽव संदेहे हरणं हार उच्यते ।**
**नानासंदेहहरणाद्यवहार इति स्मृतः ।।"** इति

तत्र व्यवहारद्रष्टुं राजा (प्रत्यहं देशदृष्टैः शास्त्रदृष्टैश्चाष्टादशमार्गेण) मन्त्रज्ञैः मन्त्रिभिः ब्राह्मणैश्च सह सभायां प्रविश्य तत्रासीनः स्थितो वा विनीतवेषाभरणः सन् कार्याणां कार्याणि पश्येत् यदा पुनः राजा स्वयं कार्यदर्शनं कर्तु न प्रभवेत्, तदा विद्वांसं ब्राह्मणं कार्यदर्शने नियुञ्जयात्। एवं तत्र सभायां सर्वथा धर्ममार्गेण विचारो भवेत्, अन्यथा सभासदः हताः भवन्ति। बालदायादिकं रिक्थं राजा बालस्यातीतशैशवं यावत् किम्वा तस्य समावर्तनसंस्कारं यावत् रक्षेत्।

पुनः बन्ध्या-पुत्रनिष्कुला-विधवा-आतुरदीनां धनमपि राजा तथैव रक्षेत्। प्रणष्टस्वामिकस्य धनं राजा त्र्यब्दं स्वपार्श्वे निधापयेत्। ततः परं सो नयेत्। त्र्यब्दाभ्यन्तरे यदि कश्चिदागत्य ममेदमिति ब्रूयात्तर्हि तं प्रणष्टधनस्य रूपसंख्यादीन् पृष्ट्वा ततः सम्यक् वदति चेत् तं दद्यात्। अन्यथा मिथ्यावाचने तं दण्डयेत् षड्भागं दशमभागं द्वादशभागं वा धर्ममनुस्मरन् । चौरापहृतं धनमपि सर्ववर्णेभ्यो दद्यात् चौरादानीय। राजा किम्बा राजपुरुषः कदापि स्वयं विवादं नोत्पादयेत्। सत्यनिर्णयार्थ धर्मेण, व्यवहारेण, छलेन, आचरितेन,बलेन च साक्षिलेख्य भुक्तिदिव्यादिभिः प्रमाणैः देशरूपकालानुसारं व्यवहारं पश्येत्। यः उत्तमर्णः अधमर्णिकात् वलादिभिः स्वयं ऋणमुद्धरयितुम् इच्छेत् राजा तं न वारयेत्। राजा-क्षत्रिय ब्रह्मचारी-सन्यासी-नट-कारुकर-दास-चौर-क्रूर-वृद्ध-बालक-चाण्डाल-विकलेन्द्रियादयः साक्षिणो न भवेयुः। स्त्रीणां साक्ष्यं स्त्रियः कुर्युः, अन्ये तु स्ववर्णानुसारं साक्षिणो भवन्ति। तत्रादौ साक्षिणः बोधनीयाः सत्यकथनाय, ततः असत्यकथनेऽकथने च तान् दण्डेन दण्डयेत् राजा। तत्र दण्डविधिस्तु तेनोक्तः यत् –(मनु.८. श्लो. १२९)

**"वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्।**
**तृतीयं धनदण्डं तु वधदण्डमतः परम् ।।"** इति

पुनश्च पृथग्रुपेण विवादपदानुसारं उत्तममध्यमाधमसाहसभेदेन दण्डरुक्तः तेन। तत्रापि धर्मेण स्वल्पाधिकपापकर्मं दृष्ट्वा तदनुसारेण दण्डविधानं कुर्याद्राजा। तदनु नवमाध्याये स्त्रीपुंधर्म कथयित्वा तत्र द्विषन्तीं योषितं पतिः संवत्सरं प्रतीक्ष्य तदूर्ध्वं दायं हृत्वा न संवसेदित्युक्तं तथैव या स्त्री सर्वदा मद्यपाऽसाधुवृत्ताप्रति-कूलाव्याधिताहिंसार्थध्नी च भवति, तदा तस्याः जीवनदशायामपि पुनर्विवाहं कुर्यात्। एवञ्च या स्त्री प्रतिषिद्धापि मद्यमभ्युदयेष्वपि गच्छेत्, सा षट्कृष्णलानि दण्ड्या भवति।पुनश्च तत्र दायभागविधिः विविच्य ततः द्यूतं समाह्वयञ्च ये कुर्वन्ति पुनश्च ये महापातकिनो भवन्ति, तान् यथाशीघ्रं राष्ट्रान्निर्वासयेत् राजा। तत्र महापातकिनो यदि प्रायश्चितं न कुर्वन्ति, तर्हि तान् शरीरिकं धनसंयुक्तं दण्डं धर्मानुसारं दद्यात्। एवमपि ते ज्ञातिसम्बन्धिभिः सर्वैश्चासम्भो-ज्याऽसंयाज्याऽसंपाठ्याऽविवाह्या सर्वधर्मवहिष्कृतासत्यवक्तव्याश्च भवन्तीति मनुना प्रतिपादितम्। तेषां दोषकारीणां प्रति कदापि दयानमस्कारादि न कुर्यादिति एतत् मनोरनुशासनं भवति ।वस्तुतस्तु मनोरनुशासनमतीवसुसंगठितं वर्तते। तत्रादौ स सर्वेषां कार्याणि नियमानि च प्रयच्छति। ततः तस्य माहात्म्यं निन्दां च प्रदर्शनपूर्वकं बोधयति। तदनन्तरं धर्मेण एतादृशं दण्डं प्रयच्छति, येन सर्वे भीत्या स्वस्वकर्मणि अभिरतानि भवन्ति । अत एवास्यानुशासनपद्धतिः प्राचीनकालादारभ्य याज्ञवल्क्य-अंगिरस-अत्रि-दक्ष-बृहस्पति-पराशर-औशनस-हारीत-आपस्तम्बादिषु सर्वेषु स्मृतिशास्त्रेषु महर्षिमनोः वचनानि अङ्गीकृतानि दृश्यन्ते । पुनश्चाधुनिकभारतीय संविधानेऽपि यथा बालावस्थायां छात्राणामध्ययनं, बालेन कार्यं न कारयित्वा तेषां भरणपोषणं, राजमार्गेषु मूत्रपुरोषादिकर्तुं निवारणं, स्त्रियाः पितृभ्राताभर्त्रादिभिः परिवारवर्गैः रक्षणं, वृक्षोच्छेदनार्थं निवारणं, पुत्रादिभिः पित्रोः भरणपोषणं, पशुपालनं सर्वहितसाधनादिकञ्च मनोः प्रतिपादितमनुशासनं नियमत्वेन परिपाल्यते। किन्तु भारतीयजनेषु लोभमोहक्रोधमदकामादीनां प्रावल्यात् अस्य पालनं सर्वैः न स्वीक्रियते। अतः सर्वत्राधर्मात्याचारधर्षणभ्रष्टाचारादिकं व्याप्तं परिलक्ष्यते। किन्तु यदि मनोरनुशासनं सर्वैः प्रायोगिकरूपेण स्वाचरणे परिपाल्यते चेत् तर्हि पुनः भारतस्य धर्मप्राणत्वं प्रतिष्ठाप्यते इति सर्वसम्मतिः। अत एवोक्तमस्ति महर्षिभृगुणा यथार्थेन "तन्मनोरनुशासनम्" इति शम्।

**सहायकग्रन्थसूची-**


1) मनुस्मृतिः- श्री. पं. हरगोविन्दशास्त्री, चौखम्भा संस्कृत भवन, वाराणसी, 2018 ।
2) याज्ञवल्क्यस्मृतिः-डा. उमेशचन्द्र पाण्डेय, चौखम्भा संस्कृत भवन, वाराणसी, 2014 ।
3) महाभारम्-गीताप्रेस, गोरखपुर, उत्तराखंड ।
4) मीमांसादर्शनम्-आनन्दाश्रममुद्रणालय, पुना ।
5) पराशरस्मृतिः- चौखम्भा संस्कृत विद्याभवन, वाराणसी ।
6) नारदस्मृतिः- चौखम्भा संस्कृत भवन, वाराणसी,1996 ।
7) वसिष्ठधर्मसूत्रम्-डां. विश्वनाथस्वाईं, पूरी, 2005 ।
8) गौतमधर्मसूत्रम्-डां. उमेशचन्द्र पाण्डेय, चौखम्भा संस्कृत संस्थान, वाराणसी, 2005 ।